श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री अभिरामवराचार्य अनुगृहीतं

# ॥ श्री यतिपतिदिनचर्या स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यतिपतिदिनचर्या स्तोत्रम् ॥

यतिपतिदिनचर्यां यश्चकारातिभोग्यम्
वरवरमुनिपौत्र स्सौम्यजामातृनामा।
गुरुरमलगुणानां वैष्णवानां मुदे तम्
गुरुजनवरमीडे गोमठाख्यान्ववायम् ॥

श्रीमद्रङ्गे दिव्यधाम्नि श्रीश्रीकान्तमनोहरे।
वसन्तं गुरुमार्याणां वन्दे रामानुजं मुनिम् ॥ 1 ॥

ब्राह्मे मुहूर्ते चोत्थाय ध्यात्वा गुरुपरंपराम्।
रहस्यत्रितयं रम्यं परव्यूहादिकांस्तथा ॥ 2 ॥

पञ्चप्रकारांश्च हरेरर्चिरादिगतेःक्रमम्।
ध्यायन्तं कूरनाथाद्यैस्सेव्यमानं गुरूत्तमैः ॥ 3 ॥

चतुश्श्लोकीं स्तोत्ररत्नं स्तोत्रं यामुनवक्त्रकम्।
भक्ताङ्घ्रिरेणुश्रीसूक्तीः प्रबोधनपराश्शुभाः ॥ 4 ॥

प्राबोधिकीश्च गोदाया स्सुक्तीर्भागवतैस्सह।
अनुसन्दधतं सम्यगाश्रये यतिशेखरम् ॥ 5 ॥

ततःप्रत्यूषसमये भक्तैश्शिष्यैर्यतीश्वरैः।
श्रीरङ्गधाम नत्वा तदुदग्भागाश्रितां नदीम् ॥ 6 ॥

कावेरीं श्रीमतीं गत्वा श्रीशध्यानपुरस्सरम्।
श्रीपतेराज्ञया सिद्धाः कृत्वा पौर्वाह्णिकीःक्रियाः ॥ 7 ॥

समुपेत्य निजन्धाम नत्वा स्वाराध्यमच्युतम्।
स्वमतस्थायिनस्सर्वान्वेदपारायणेरतान्॥ 8॥

वेदान्ततर्कमीमांसाव्याख्यातॄन्वैष्णवानपि।
इतिहासपुराणादिपारायणपरानपि॥ 9॥

कर्मयोगादिनिरतान् परव्यूहादिषु स्थितान्।
श्रीमच्छठारिमुख्यानां मुनीनां सूक्तितत्परान्॥ 10॥

सर्वानुपेत्य सस्नेहं नन्दयन्तं नमामि तम्।
ततःश्रीरङ्गराजस्य सेवार्थं स्वाश्रितैस्सह॥ 11॥

प्रयान्तं मन्त्ररत्नानुसन्धानासक्तचेतसम्।
दक्षिणेन धृतश्रीमत्त्रिदण्डं पाणिनादरात्॥ 12॥

अन्यपाणितलस्पृष्टकूरनाथकरांबुजम्।
प्रदक्षिणीकृत्य शनैः श्रीरङ्गं धामतन्महत्॥ 13॥

चतुराननामानं समेत्यानम्य गोपुरम्।
गोदां शठारिं योगीन्द्रं बलिपीठं तथैव च॥ 14॥

प्रदक्षिणक्रमेणैव पाकशालालयां श्रियम्।
श्रीमद्रङ्गावरवरं विमानं रङ्गसञ्ज्ञकम्॥ 15॥

सेनापतिं च निचुलां नायिकां रङ्गिणः पदे।
वासुदेवं द्वारपालौ वैनतेयं प्रणम्य च॥ 16॥

मङ्गळाशासनं कृत्वा तत्रतत्र यथोचितम्।
ऊरीकृत्य च तीर्थाद्यमुल्लसन्तं मुनिं भजे॥ 17॥

छत्रोपलक्षितद्वारं ततश्श्रीमदुपेत्य च।
आद्यमर्चावताराणामाविर्भूतं यदृच्छया॥ 18॥

इक्ष्वाकूणां कुलधनमिष्टदैवं श्रियःपतिम्।
कावेरीपुलिने रम्ये शेषपर्यङ्कशायिनम्॥ 19॥

नाथयामुनपूर्वाणां गुरूणां कुलदैवतम्।
श्रीरङ्गराजं देवेशं दृष्ट्वाचार्यपुरस्सरम्॥ 20॥

साष्टाङ्गं सम्यगानम्य सहशिष्यैश्च भक्तितः।
अन्तःप्रविश्य सामोदमामोदस्तंभमेव च॥ 21॥

श्रीभट्टनाथ श्रीसूक्तैः मङ्गळाशासनात्मकैः।
जितन्तास्तोत्ररत्नाभ्यां भीतिप्रीति पुरस्सरम्॥ 22॥

मङ्गळाशासनं शौरेः कुर्वन्तं गुरुमाश्रये।
ततो विमाने प्रणवाकारे व्यक्ते स्वयंभुवि॥ 23॥

दिव्यसिंहासने रम्ये स्थितं पद्मासनेऽग्रतः।
कस्तूरीतिलकाद्रम्यात्कान्तफालतलं हरिम्॥ 24॥

कञ्जाक्षं कान्तवदनं कमनीयाङ्गसुन्दरम्।
पाणिपद्मचतुष्केण स्वाश्रिताभीष्टदायिनम्॥ 25॥

शङ्खचक्रेव दधतं गदामभयमुद्रिकाम्।
आसन्नाभ्यां रमाभूभ्यां पार्श्वयोः पर्युपासितम्॥ 26॥

सर्वावयव सौन्दर्यादभिरामवराभिधाम्।
संप्राप्तं भट्टनाथोक्त्या तदा गोदासमर्पणे॥ 27॥

संसेव्यानन्दभरितं संश्रये यतिशेखरम्।
ततश्श्रीरङ्गराजस्य श्रीमतश्शेषशायिनः॥ 28॥

पादारविन्दे परमे भक्ताभीष्टप्रदे शुभे।
सौवर्णकाहलाकारे जङ्घे दिव्येचजानुनी॥ 29॥



sunder kidambi prapatti dot com sunder kidambi

कदलीकान्त काण्डोरु युगलञ्चाति सुन्दरम्।
काञ्चनांबरखण्डाभ्यां कमनीयकटीतटम्॥ 30 ॥

दिव्यांसनाभिमध्यञ्च त्रिवल्या शोभितोदरम्।
लक्ष्मीकेलिगृहं रम्यं ललितं कौस्तुभश्रिया॥ 31 ॥

वक्षस्स्थलं मनोहारि वैजयन्त्या विभूषितम्।
ग्रैवेयभूषारुचिरं कण्ठं कंबुसमाकृतिम्॥ 32 ॥

उपधानीकृतं बाहुमुत्तमाङ्गसमीपतः।
दक्षिणञ्च तथा जानुविश्रान्तं दक्षिणं भुजम्॥ 33 ॥

पद्माभिरामवदनं पद्मपत्रेक्षणद्वयम्।
सुभ्रूयुगं सुनासञ्च सुकपोलतलद्वयम्॥ 34 ॥

सुन्दरं चुबुकं चापि सुस्मिताधरपल्लवम्।
कान्तकुण्डलसंशोभिकर्णपाशयुगं तथा॥ 35 ॥

सुललाटं च तत्रोर्ध्वपुण्ड्रञ्चापि ललाटिकाम्।
सर्वाधिराज्यपिशुनं सर्वदेव नमस्कृतम्॥ 36 ॥

दिव्यरत्नकिरीटञ्च दर्शं दर्शं पुनः पुनः।
मुनिवाहनयोगीन्द्रसूक्त्युच्चारणपूर्वकम्॥ 37 ॥

आपादचूडं संसेव्यं सर्वावयव भोग्यताम्।
श्रीरङ्गराजं शरणं प्रार्थयन्तं भजामि तम्॥ 38 ॥

ततः श्रीरङ्गराजस्य श्रीमतीं धृतशाटिकाम्।
पाद्यतीर्थं प्रसादं च पादुकांमालिकां शुभाम्॥ 39 ॥

अङ्गीकृत्य कृपामूल मनुज्ञाप्याश्रितैस्सह।
विमानं प्रणवाकारं विधायान्तःप्रदक्षिणम्॥ 40 ॥

छत्रोपलक्षितद्वारात् प्राग्देशे श्रीशभक्तितः।
स्थित्वा कालं क्षणं देवमनुभूय पुनःपुनः॥ **41** ॥

द्वारात्तस्माद्बहिश्चैत्य नत्वा क्षामणपूर्वकम्।
बलिपीठं ततःप्राप्य प्रणमन्तं भजामि तम्॥ **42** ॥

ततो महामण्टपं तदेत्य श्रीरङ्गशायिनः।
कैङ्कर्यवर्धकान् भक्तान् किङ्करांश्चानुमान्य च॥ **43** ॥

श्रीरङ्गशयमुद्वेलं परामृश्योत्तरोत्तरम्।
कलिजिन्निर्मितं सम्यग्धान्यागारञ्च योगिनः॥ **44** ॥

श्रीगोपुरवरासीनमानम्य नृहरिं ततः।
श्रीरङ्गराजमहिषीं सेव्यां सर्वात्मभिस्सदा॥ **45** ॥

श्रीशाश्रये च जीवानां प्राप्तां पुरुषकारताम्।
जननीं सर्वलोकानां श्रियं देवीमुपेत्य च॥ **46** ॥

संसेव्य शिष्यैर्भक्तैश्च मङ्गळाशास्ति पूर्वकम्।
तीर्थादिकं च स्वीकृत्य परिक्रम्य प्रदक्षिणम्॥ **47** ॥

सहस्रस्तंभसंयुक्तं नमस्कृत्वाच मण्टपम्।
स्वीयं मठं समासाद्य सच्चिष्यैः प्रमपूर्वकम्॥ **48** ॥

व्याख्यानकूटे विमले विद्वज्जननिषेविते।
पद्मासनस्थं पद्माक्षपादाब्जन्यस्तमानसम्॥ **49** ॥

प्रसन्नवदनांभोजं प्रफुल्लांबुजलोचनम्।
ऊर्ध्वपुण्ड्रैर्विराजन्तमुल्लसद्भिर्मनोहरैः॥ **50** ॥

ब्रह्मसूत्रेण शुभ्रेण शोभितं ब्रह्मतेजसा।
पद्माक्षतुलसीमालापरिष्कृतभुजान्तरम्॥ **51** ॥

sunder kidambi prapatti dot com sunder kidāmbi

त्रिदण्डमण्डितोरस्कं दिव्यज्ञानामृतोदधिम्।
काषायवस्त्रसंशोभि कटीतटमनोहरम्॥ 52 ॥

श्रीमद्वैष्णव सिद्धान्तं प्रतिष्ठान देशिकम्।
वेदान्तविद्यां विमलां व्याकुर्वन्तं मृदूक्तिभिः॥ 53 ॥

शिष्येभ्यो हितकामेभ्यः श्रीशशेषत्वबोधिनीम्।
भक्तैर्भागवतैश्चापि सेव्यमानं यतीश्वरम्॥ 54 ॥

श्रीभाष्यकारं सेवेऽहं श्रीकान्तानन्दवर्धनम्।
ततः श्रीपादतीर्थैस्स्वैश्शिष्याणाञ्च महात्मनाम्॥ 55 ॥

सतां सफलयन्तं तं संश्रये यतिशेखरम्।
ततो माध्याह्निकं कृत्यमनुष्ठाय यथाविधि॥ 56 ॥

स्वीयं कुलधनं श्रीशमाराध्य करुणाकरम्।
श्रीमद्रङ्गाधिराजस्य पूजां माध्याह्निकीं शुभाम्॥ 57 ॥

सञ्जातां भक्तितः कृत्वा भक्तैः यतिवरैस्सह।
हार्दपूरुषभोग्यं चेत्यनुयागं विधाय च॥ 58 ॥

प्रसादपात्रं कुर्वाणं भक्तवर्गं यथोचितम्।
प्रपद्ये भक्तवर्गाणां पारिजातं यतीश्वरम्॥ 59 ॥

ततश्चैकान्तमाश्रित्य सन्निविष्टं कृताञ्जलिम्।
श्रीभूपतेश्च चरणौ चिन्तयन्तं भजामि तम्॥ 60 ॥

ततश्शठारियोगीन्द्र सूक्त्यर्थानुभवैर्मुहुः।
भक्तानां भगवद्भक्तिं वर्धयन्तं नमामि तम्॥ 61 ॥

ततस्सायन्तनं कर्म कृत्वा श्रीरङ्गशायिनम्।
ध्यात्वा प्रपद्ये देवेशमाराध्य स्वीयमच्युतम्॥ 62 ॥

sunder kidambi prapatti.com sunder kidambi

वेदार्थ वाक्य तत्त्वार्थैः विमलज्ञानसंपदः।
बोधयन्तं निजान् भक्तान् पुण्यश्लोकं नमामि तम्॥ 63॥

ततः श्रीशेष पर्यङ्के शयानं रङ्गशायिनः।
सर्वोपचारसहितं योगनिद्रात्मकं हरेः॥ 64॥

श्रुत्वा श्रीमति पर्यङ्के सौम्ये कृष्णाजिनात्मके।
संवाह्यमानचरणं सच्छिष्यैश्च गुरूत्तमैः॥ 65॥

पत्युश्श्रियःप्रसादेन भगवद्योगमास्थितम्।
भगवत्प्राप्तिघटकं स्वाश्रितानां महात्मनाम्॥ 66॥

श्रीभाष्यकारं यमिनं यतिराजं दयांबुधिम्।
प्रपन्नजनकूटस्थं प्रपद्ये भक्तवत्सलम्॥ 67॥

शेषांशेनावतीर्णाय श्रीरामानुजयोगिने।
गुरूणां गुरवेभूयान्नित्यश्रीर्नित्यमङ्गळम्॥ 68॥

श्रीमतीं यतिराजस्य दिनचर्यामिमां पठन्।
प्राप्नुयात्परमां भक्तिं यतिराजपदाब्जयोः॥ 69॥

श्रीमद्रङ्गे महति नगरे नित्यवासी महात्मा
त्रय्यन्तार्थस्थितिमुपदिशन् भूतले पुण्यकीर्तिः।
श्रीमान् रङ्गेश्वरचरणयोर्मङ्गळानि प्रयुञ्जन्
शेषांशेन प्रथितविभवो भाति रामानुजार्यः॥ 70॥

॥ इति श्री यतिपतिदिनचर्या स्तोत्रं समाप्तम्॥